12. Hafta

# चोरो बालकः

कश्चित् बालः पाठशालायां कस्यापि सहाध्यायिनः पुस्तकमचोरयत्। तत् स गृहमानीय मातुर्हस्तेऽर्पितवान्। तया स तदा तीव्रं दण्डनीय आसीत्। तदकृत्वा सा तस्य कृत्यमभिनन्द्य तस्मा आम्रफलमेकं भक्षणार्थमयच्छत्।

गच्छति काले यथा यथा सोऽवर्धत तथा तथा तस्य स्तेयबुद्धिरपि वृद्धिं गता। किं बहुना! कालेन स महांश्चोरः संवृत्तः।

एकदा स रात्रौ सन्धिच्छेदेन कस्यचिद्धनिकस्य गृहं प्राविशत्। गाढं निद्रिता अपि तद्गृहस्था जनाः सन्धिच्छेदशब्देन प्रबोधं गताः। तान्

सर्वान् स व्यापाद्य महार्घाणि रत्नान्यादाय प्रतस्थे। पथि गच्छन् स रक्षापुरुषैर्गृहीतस्ताडितो दण्डाधिपस्य समीपं नीतश्च।

दण्डाधिपस्तस्य वधदण्डं व्यधात्। तदनु वध्यभूमिं नीयमानः स राजपुरुषानब्रवीत्' – 'भो भेः! सकृन्मे मात्रा सह भाषणमनुमन्यध्वम्'- इति। ततस्तैः साक्रन्दं पृष्ठत आगच्छन्त्या मात्रा सह तस्य भाषणमन्वमन्यत।

कुमारस्तस्याः कर्णे रहस्यं कथयन्निव तामुपसृत्य तस्याः कर्णं ददंश। 'अहो! मृत्युना गृहीतोऽपि पापोऽयं मात्रे द्रुह्यति' इत्युच्चैरूचुस्तत्र मिलिता जनाः। तदाकर्ण्य कुमारः - 'भो जनाः! नाहं पापः। किन्त्वेषैव पुत्रघातिनी राक्षसी। आम्रफलदानेनैषा मम स्तेयासभि मवर्धयत्' इत्युक्त्वा स पूर्ववृत्तान्तं तेभ्योऽकथयत्।